FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

This Question Paper consists **16 pages.** Of this **42 questions** for **New syllabus** and **37 questions** for **Old syllabus.**
अस्मिन् प्रश्नपत्रे 16 मुद्रित पृष्ठाः च सन्ति । नूतनपाठ्यक्रम द्विचत्वारिंशत् प्रश्नाः एवम् प्राचीनपाठ्यक्रम सप्तत्रिंशत् प्रश्नाः सन्ति ।

**Roll No.** | | | | | | | | | | | | |
अनुक्रमाङ्कः अङ्केषु

**Code No. 46/S/A/S**
कूट सं.

# SANSKRIT
# संस्कृतम्
# (209)

**Day and Date of Examination**
(परीक्षादिवसः दिनाङ्कश्च) ____________________

**Signature of Invigilators** 1. ____________________
(निरीक्षकहस्ताक्षरद्वयम्) 2. ____________________

सामान्य अनुदेशाः :

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति ।

3 वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथकरूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत् ।

4 वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।

5 उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

6 स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **46/S/A/S** अवश्यं लेखनीया ।



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

## महत्त्वपूर्ण – अनुदेशाः :

1 अस्यां प्रश्नपुस्तिकायां प्रश्नपत्राणां भागद्वयं वर्तते । एकाः भागः संशोधितायां पाठ्यसामग्र्यां आधारितः वर्तते । यस्या अङ्गनं – "नूतनपाठ्यक्रमरूपेण" वर्तते । अन्य संशोधनात् पूर्वस्यां आधारितः वर्तते । यस्या अङ्गनं "प्राचीनपाठ्यक्रमरूपेण" वर्तते ।

2 येषां नामांकनं 2012-13 (ब्लाक–1) कृते अभवत् [ये 2012-13 वर्षस्य अप्रैलमासे नूतनपाठ्यक्रमो प्रवेशं गृह्णिष्यन्ति] तेषां कृते नूतनः पाठ्यक्रमः अनिवार्यः वर्तते ।

3 येषां नामांकनं 2012-13 (ब्लाक–1) पूर्वं अभवत् तेषां कृते प्राचीनपाठ्यक्रमः अनिवार्य वर्तते ।

4 उपरिनिर्दिष्टनिर्देशानुसारं एकस्येव भागस्य प्रश्नान उत्तरयतुः ।

5 द्वयोः भागयोः प्रश्नानां मिश्रणं निषिद्धं वर्तते ।



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

# SANSKRIT

**NEW**

## संस्कृतम्

## (209)

**New Syllabus**

समय : होरात्रयम् पूर्णाङ्काः – 100

निर्देशाः –

1 अस्मिन् प्रश्नपत्रे द्विचत्वारिंशत् प्रश्नाः सन्ति ।

2 प्रत्येकम् प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

3 सर्वे प्रश्नाः अनिवार्याः ।

### खण्डः – क

1 रक्तमुखः वानरः कुत्र वसति स्म ? 1

(A) आम्रवृक्षे (B) जम्बुवृक्षे

(C) लताकुञ्जे (D) शिंशयावृक्षे

2 खगालयाः कीदृशैः पक्षिशावकैः युक्ताः ? 1

(A) जातपक्षैः (B) चलनोन्मुखैः

(C) अजातपक्षैः (D) पक्षहीनैः

3 जनाः मनसा किं कुर्वन्ति ? 1

(A) पश्यन्ति (B) ध्यायन्ति

(C) श्रृण्वन्ति (D) जिघ्नन्ति



www.FirstRanker.com

FirstRanker.com
Firstranker's choice


4 रक्तमुखः वानरः किं खादति स्म ? 1

(A) रक्तफलानि (B) आम्रफलानि

(C) दाडिमफलानि (D) जंबुफलानि

5 पृथिवी कं परितः परिभ्रमति ? 1

(A) चन्द्रम् (B) सूर्यम्

(C) भूमण्डलम् (D) आकाशम्

6 वायोः अधिकं गतिशीलम् किमस्ति ? 1

(A) मित्रम् (B) मुखम्

(C) मनः (D) सहिष्णुत्वम्

7 'स्नानेन बहवः रोगाः नश्यन्ति' इत्यत्र 'बहवः' इति पदे का विभक्तिः ? 1

(A) प्रथमा (B) द्वितीया

(C) पंचमी (D) षष्ठी

8 'विविधायुधैः सुसज्जितः महासत्त्वः' इत्यत्र किं विशेषणपदम् ? 1

(A) विविधायुधैः (B) महासत्त्वः

(C) सुसज्जितः (D) सज्जितः

9 'दौवारिकः प्रभुवर्यस्य आदेशं पालयति' इत्यत्र रेखांकितपदे कः लकारः ? 1

(A) लङ् (B) लोट्

(C) विधिलिङ् (D) लट्



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

10 'वैदिकमन्त्रेषु सर्वमानवकल्याणभावना <u>विद्यते</u>' इत्यत्र रेखांकितस्य बहुवचनं भविष्यति – 1

(A) विद्येते (B) विद्यन्ते

(C) विद्यथे (D) विद्यध्वे

11 'विरहकातरं तपोवनम्' इति पाठे के शकुन्तलायाः सख्यौ? 1+1=2

12 "आमरणान्तिकं शल्यं प्रच्छन्तं यत्कृतं पापम्।" इत्यत्र कथं कृतं पापम् मृत्युपर्यन्तं शल्यवत् कष्टप्रदं भवति? 1+1=2

13 "अहेतुः पक्षपाते यस्तस्य नास्ति प्रतिक्रिया।" इति कस्य उक्तिः? कस्य च प्रतिक्रिया नास्ति? 1+1=2

14 अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत – 1×3=3

सुमन्तः – वत्स मन्ये कुमारेण जृम्भकास्त्रं प्रयुक्तम्।

चन्द्रकेतुः – अत्र कः सन्देहः ! पश्यतु सैन्यम्।

चित्रलिखितमिव अस्पन्दम् आस्ते अतोऽजितवीर्यं जृम्भकास्त्रमेवेदम्।

*प्रश्नाः :*

(i) जृम्भकास्त्रं केन प्रयुक्तम्?

(ii) जृम्भकास्त्र प्रयोगेन सैन्यं कीदृशं जातम्?

(iii) कुत्र सन्देहः नास्ति?

15 'गीतामृतम्' इति पाठानुसारं तामस–भोजनस्य लक्षणद्वयं लिखत। 1+1=2

16 अधोलिखितेषु, एकस्य चरित्रचित्रणं पञ्चवाक्येषु कुरुत। 5

शकुन्तला अथवा चन्द्रकेतुः



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

17 ''मनः शीघ्रतरं वातात् चिन्ताबहुतरी तृणात्।'' इत्यत्रः वातात् शीघ्रतरं किम् ? तृणात् च बहुतरी का? 1+1=2

18 'सत्याग्रहाश्रमः' इति पाठः कस्मात् ग्रन्थात् गृहीतः? तस्य लेखकस्य किं नाम? 1+1=2

19 स्नानेन के–के रोगाः नश्यन्ति? 1+1=2

20 कीदृशं भोजनं कदा कर्त्तव्यम्? 3

21 अधोलिखितपद्यस्य अन्वये रिक्तस्थानानि पूरयत – 3

सर्वेन्द्रियाणि संयम्य बकवत् पतितो जनः।
कालदेशोपपन्नानि सर्वकार्याणि साधयेत्॥

अन्वयः–बकवत् (i) _________ संयम्य (ii) _________ जनः कालदेशो पपन्नानि सर्वकार्याणि (iii) _________ ।

अथवा

अधोलिखितभावार्थे रिक्तस्थानानि पूरयत –

स्नानेन (i) _________ मनसः च परिशुद्धिः भवति, स्नानम् आयुः (ii) _________ बलं वर्धयति यतो हि इदं (iii) _________ दीपकम्।

22 रेखाङ्कितपदमाधृत्य प्रश्न निर्माणं कुरुत – 1+1=2

(i) भार्या मित्रं गृहे सतः।

(ii) सलीलमीशः सृजति भुवम्।



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

23 ''न वयं दौवारिकाः ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे'' – इयं कस्य कम्प्रति उक्तिः ? 1+1=2

24 चन्द्रकेतुः कीदृशः वीरः अस्ति ? सः कम् उद्दिश्य बहूनां सैनिकानां युद्धं दृष्टवा लज्जते ? 1+1=2

25 अधोलिखितगद्यांशं पठित्वा प्रश्नान् उत्तरत –

यदि कठोरायां शिलायां कोमलैः घटैः गर्ताः भवन्ति तर्हि पुनः–पुनः अभ्यासेन कथम् अहं विषयान् न अवगमिष्यामि। अहमपि मनोयोगेन पठिष्यामि लेखिष्यामि, स्मरिष्यामि कुशाग्रबुद्धिः च भविष्यामि।

(i) 'यदि कठोरायां शिलायाम्' – इति कस्य उक्तिः ? 1

(ii) शिलायां गर्ताः कथम् अभवत् ? 1

(iii) मनोयोगेन पठित्वा मानवः किं भवति ? 1

26 ततोऽसुराः पुरायान्तं तस्य देवेन्द्रस्य रथं विलोक्य तत्पराक्रमस्यअतिशयसंभावनयाभयाकुलाः प्रणतिं गताः। अनन्तरं सहर्षलज्जैः देवैः सत्क्रियमाणः जयश्रिया अलङ्कृतः शक्रः स्वपुरम् अगच्छत्।

(i) कस्य रथं विलोक्य असुराः भयाकुलाः प्रणतिं गताः ? 1

(ii) देवैः कः सत्क्रियमाणः स्वपुरम् अगच्छत् ? 1

(iii) कीदृशैः देवैः शक्रः सत्क्रियमाणः आसीत् ? 1

27 कस्यचित् एकस्य लेखकस्य परिचयं पञ्चवाक्येषु लिखत – 5

(i) महाकविकालिदासः

(ii) भवभूतिः



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

## खण्डः – ख

## अनुप्रयुक्त व्याकरणम् (२५)

28 अधोलिखितानां वर्णानाम् उच्चारणस्थानानि लिखत – ½×4=2

य, त, ष, ग

29 अधोलिखितयोः पदद्वयोः सन्धिच्छेदं कुरुत – 1+1=2

प्रभेव, दृष्ट्वैव

30 अधोलिखितानां सन्धीनामप्रत्येकस्य एकमुदाहरणं लिखत – 1×3=3

दीर्घसन्धिः, गुणसन्धिः, व्यञ्जनसन्धिः।

31 अधोलिखितपदेषु काः विभक्तयः कानि च वचनानि – इति लिखत – ½×4=2

विद्वद्भ्याम्, राज्ञः, आत्मनः, आवयोः।

32 रिक्तस्थानेषु अंकानां स्थाने संख्यावाचकपदानि लिखत – 1×3=3

(i) विद्यालये 6 अध्यापकाः पाठयन्ति।

(ii) युद्धे 10 सैनिकाः युध्यन्ति।

(iii) ते 3 छात्राभिः सह आगच्छन्ति।

33 रेखाङ्कितपदयोः कौ मूलधातू कः च लकारः? 1+1=2

(i) त्यज नाहं पुनरायास्यामि।

(ii) जलं रक्षति रक्षितम्।



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

34 रेखाङ्कितपदयोः कौ मूलधातू कः च लकारः ? 1+1=2

(i) पादपाः न जिघ्रन्ति।

(ii) दौवारिकः उत्कोचं न स्वीकरोति।

35 अधोलिखितयोः समस्तपदयोः विग्रहं लिखत – 1+1=2

पापपुण्यौ, शिशुप्रेमी।

36 अधोलिखितविग्रहाणां कृते समस्तपद लिखत – 1+1=2

(i) मलिनं वपुः यस्य सः

(ii) राज्ञः लक्ष्मीः

37 रिक्तस्थाने किं पदं भविष्यति ? 1+1=2

(i) ग्रहाणां नक्षत्राणां महत्त्वपूर्णं ज्ञानं तेन _________ (दा + क्त)

(ii) आर्यभटेन कः ग्रंथः _________ (विरच् + क्त)

38 रेखांकितपदेषु रिक्तस्थानानि पूरयत – 1×3=3

(i) भवभूतिः _________ रचनाम् अकरोत्। (उत्तररामचरित)

(ii) विद्यालयम् उभयतः _________ स्तः। (नदी)

(iii) अंतरिक्षे ओजोननाम्ना प्रसिद्धायां _________ छिद्राणि सन्ति। (झिल्लिका)



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

खण्डः – ग

रचनाकौशलम् (२०)

39 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत –

दीपावलीपर्व भारतीयानां प्रमुखं पर्व विद्येत। अस्मिन् दिवसे श्रीरामः पितुः आज्ञां पालयन् चतुर्दशवर्षाणि वने उषित्वा रावणं हत्वा, स्वपत्नीं सीतां च विमोच्य अयोध्यानगरीं परावृत्तः आसीत्। तस्मादेव कालात् भारतीयाः प्रतिवर्षं कार्तिक–अमावास्यायां स्वगृहेषु दीपान् प्रज्वालयन्ति। अस्मिन्नेव दिवसे रात्रौ महालक्ष्मीपूजनं क्रियते। अस्मात् पर्वणः पूर्वं जनाः स्वगृहाणां शुद्धिं कुर्वन्ति, गृहाणि च सज्जयन्ति।

*प्रश्नाः* : 1×5=5

(i) दीपावल्यां रात्रौ किं क्रियते ?

(ii) दीपावली केषां प्रमुखं पर्व अस्ति ?

(iii) दीपावली कस्मिन् दिने भवति ?

(iv) 'पर्वणः' इति पदे का विभक्तिः ?

(v) 'स्वपत्नीं सीतां' अनयोः पदयोः विशेषणपदं किम् ?

firstranker.com

40 अधोलिखितविषयम् अधिकृत्य मञ्जूषापदसहायतया पञ्चवाक्येषु एकम् अनुच्छेदं लिखत – 1×5=5

'शिक्षकदिवसः'

| मञ्जूषा |
|---|
| अनेकत्र, सितंबरमासस्य, पञ्चमे दिवसे, महत्त्वं, शिक्षकाणां, प्रगीयते, पूर्वराष्ट्रपति राधाकृष्णन् महोदयस्य, जन्मदिवसे, आयोज्यते, शिक्षकाणां स्तुतिः |



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

41 मित्रं प्रति, परीक्षायां सफलतायै लिखितं पत्रं, मञ्जूषायां प्रदत्तैः शब्दैः पूरयत – 1×5=5

नवदेहली
25.6.2011

(i) ______________ ।
(ii) ______________ ।

भवतः परीक्षासफलतापत्रम् अद्यैव (iii) ______________ ।
भवतः उत्तीर्णतां ज्ञात्वा मयि अति (iv) ______________ अस्ति।
अहोरात्रं प्रयासं विधाय 95 प्रतिशतं (v) ______________
लब्धवान्। भवान् मम साधुवादान् अर्हति।
भवते पुनः वर्धापनं,

भवतः मित्रम्
सुरेन्द्रः

मञ्जूषा

सन्तोषः, प्राप्तम्, अंकान्, प्रियमित्र, नमोनमः, पितृभ्याम्

42 अधोलिखितं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि लिखत – 1×5=5




मञ्जूषा

शब्दसूची = रेलयानम्, रेलस्थानकम्, यात्रिणः, आरोहन्ति, अवरोहन्ति, भारवाहका, नयन्ति, भारम्।



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

# SANSKRIT

**OLD**

## संस्कृतम्

## (209)

**Old Syllabus**

समय : होरात्रयम् पूर्णाङ्काः – 100

निर्देशाः –

1 अस्मिन् प्रश्नपत्रे सप्तत्रिंशत् प्रश्नाः सन्ति ।

2 प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

3 सर्वे प्रश्नाः अनिवार्याः ।

1 'प्रेरणा' इति पाठे बोपदेवः शिलाखण्डे कान् दृष्ट्वा प्रेरणां प्राप्तवान् – 1

(A) महिलाः (B) घटान्

(C) गर्त्तान् (D) बालकान्

2 कस्मात् हतः नरः हतः भवति? 1

(A) वित्ततः (B) वृत्ततः

(C) सत्यात् (D) योगात्

3 त्याज्यं न धैर्यम् इति पाठे 'पूर्वं कथं न कथितं त्वया' इति कः कं वदति? 1

(A) मकरः–वानरम् (B) वानरः–मकरीम्

(C) मकरः–मकरीम् (D) वानरः–मकरम्

4 'खात् पितोच्चहरस्तथा' इति पंक्तौ खात् इति पदस्य कः अर्थः? 1

(A) कूपात् (B) समुद्रात्

(C) आकाशात् (D) इन्द्रियात्



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

5 'वार्यधिगच्छति' इति अत्र सन्धिच्छेदः कथं भविष्यति? 1

(A) वारी + अधिगच्छति (B) वारि + अधिगच्छति

(C) वार्य + धिगच्छति (D) वारि + यधिगच्छति

6 वृत्तं यत्नेन संरक्षेत् इति अत्र रेखाङ्कित क्रियापदे कः लकारः? 1

(A) लोट् (B) लट्

(C) विधिलिङ् (D) लङ्

7 अत्र लृट् लकारे किं पदम शुद्धम्? 1

(A) गमिष्यति (B) स्मरिष्यामि

(C) लेखिष्यसि (D) पश्यामः

8 अत्र द्वितीयाबहुवचनान्तं किं रूपम्? 1

(A) भवान् (B) पिपासाम्

(C) भ्रातृणाम् (D) नरान्

9 घटोत्कचः कस्याः पुत्रः आसीत्? सः कम् आनीतवान्? 1+1=2

10 चन्दनविटपः विधिना कीदृशः विहितः, केन च सः परेषां सन्तापम् अपहरति? 1+1=2

11 'भवता', 'चक्षुषा' इति पदद्वयम् बहुवचने किं रूपं भविष्यति? 1+1=2

12 यदि आयुःक्षयोस्ति तदन्यत्र गतानामपि मृत्युः भविष्यत्येव इति कः कं कथयति? 1+1=2

13 अतृणे पतितो वह्निः स्वयमेवोपशाम्यति इति पंक्तौ तृणरहिते, अग्निः इति अर्थयोः कौ शब्दौ प्रयुक्तौ? 1+1=2

14 श्वसन्तः, वदन्तः इति पदद्वयम् एकवचने कथं भविष्यति? 1+1=2



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

15 रिक्तस्थानं पूरयत : 1+1=2

(i) भगवन् मा गच्छ। त्वमेव __________ श्रेष्ठः। (अस्मद् सप्तमी बहुवचनम्)

(ii) त्वम् एव __________ नियन्ता। (अस्मद् षष्ठी बहुवचनम्)

16 भास्कराचार्यस्य सर्वप्रसिद्धा कृतिः का अस्ति? अस्याः मुख्यतः कति भागां सन्ति? 1+1=2

17 श्रृंगवेरपुरं चैतत् गुहो यत्र सखा मम इति अत्र गुहः कस्य सखा? स च श्रृंगवेरपुरे किम् अकरोत्? 1+1=2

18 'लीलावती भास्कराचार्यस्य पुत्री आसीत् इति मन्यते' इति वाक्ये किं किं क्रियापदम्? 1+1=2

19 प्रश्नान् उत्तरत – 1×3=3

(i) भोजनान्ते च किं पेयम्?

(ii) जयन्तः कस्य वै सुतः ?

(iii) कथं विष्णुपदं प्रोक्तम्?

20 गद्यांशं पठित्वा प्रश्नान् उत्तरत 1×3=3

तस्य शक्रस्य सर्वलोकेषु व्याप्तां कीर्त्तिम् अत्यद्भुतां लक्ष्मीं च असहमानाः दैत्यगणाः ईर्ष्यालवः जाताः। ते द्विरद – रथ – तुरगपदातियुक्तेन महता सैन्यबलेन एनम् आक्रान्तवन्तः।

*प्रश्ना :*

(i) शक्रस्य अत्यद्भुतां लक्ष्मीं दृष्ट्वा के ईर्ष्यालवः जाताः ?

(ii) शक्रस्य सैन्यं केन केन युक्तम् आसीत्?

(iii) शक्रस्य कीर्त्तिः कुत्र कुत्र व्याप्ता जाता?

21 पद्यं पठित्वा प्रश्नान् उत्तरत – 1×3=3

नैर्मल्यं भावशुद्धिश्च विना स्नानं न युज्यते। तस्मात्कायविशुद्ध्यर्थं स्नानमादौ विधीयते॥

*प्रश्ना :*

(i) कायविशुद्ध्यर्थं किं करणीयम्?

(ii) 'सर्वप्रथम' इति अर्थे किं पदमत्र प्रयुक्तम्?

(iii) स्नानं विना किं किं न युज्यते?



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

22 'अनागतं यः कुरुते स शोभते' इति पाठे गुहायां कः प्रविष्टः ? शृगालः किं दृष्ट्वा जानाति यत् गुहायां सिंहः अस्ति। सः शृगालः गुहां किं कर्तुं कथयति? 1×3=3

23 पद्यांशं पठित्वा प्रश्नान् उत्तरत – 2+1=3

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥

*प्रश्ना :*

कीदृशं वाक्यं तपः उच्यते?

24 मण्डनमिश्रस्य गृहस्य किं वैशिष्ट्यमासीत्? तत्र कुत्र स्थिताः काः कांचर्चां कुर्वन्ति स्म? 1×3=3

25 'इयं हि रघुसिंहानां वीरचारित्रपद्धतिः' इति कः कथयति ? चन्द्रकेतुः किं कर्तुमिच्छति यत् रघुकुलानुकूलम् भवेत्? 1×3=3

26 स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव।
पुनर्ददताऽघ्नता जानता संगमेमहि॥ 1×3=3

इति पद्ये वयं कौ इव कीदृशं पन्थानम् अनुचरेम, केन सह च संगतिं कुर्याम?

27 आर्यभटः कं ग्रन्थम् अरचयत्? तस्य अन्वेषणद्वयं 1×3=3

(i) गणिते

(ii) भुवः परिमाणविषये च वर्णयत।

28 (i) मार्दवसम्पन्नानां पुरतः कानि शाम्यन्ति? 1×3=3

(ii) विद्या किं ददातिः

(iii) अभिमानी नरः बिन्दुमात्रं जलं पीत्वाऽपि किं चिन्तयति?

29 ऊष्मतो म्लायते वर्णस्त्वक् फलं पुष्पमेव च।
म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते॥ 1×3=3

इति पद्यं पादपानां विषये किं सूचयति?

निदाघे ग्रीष्मर्तोः तापात् तेषां किं किं म्लानं भवति ?



www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

30 'गुरुवचनम् अमलम् अपि सलिलम् इव महदुपजनयति श्रवणस्थितं शूलम् अभव्यस्य' इति वाक्ये कस्य कर्णे किं शूलम् उत्पादयति अत्र का उपमा दत्ता? 1×3=3

31 'साहसे श्रीःप्रतिवसति' इति पाठे वेतालः राजानं किं श्रावयति, कथायाः अन्ते किं भवति ? किमर्थं वेतालः पुनः शिंशपतरौ लम्बते? 1×3=3

32 घोषितं हि यदा तेन शासकानामुपस्थितौ कारागृहे च निक्षिप्तः भयशून्यो दृढव्रतः। लोकमान्यः तिलकः किं घोषितवान्? तस्य कः परिणामः जातः ? लोकमान्यस्य किं गुणद्वयमत्र वर्णितम्? 1×3=3

33 'भारतस्य महिमा' इति विषयम् अधिकृत्य षड् वाक्येषु अनुच्छेदं लिखत। 1×6=6

34 शकुन्तलायाः विरहे तपोवनस्य का अवस्था अभवत्? षड् वाक्येषु लिखत। 1×6=6

35 कस्यचिदेकस्य पाठस्य सारं षड्वाक्येषु लिखत : 1×6=6

(i) मातुराज्ञा गरीयसी

(ii) अनागतं यः कुरुते सः शोभते

(iii) व्यायामस्य महत्त्वम्

36 कमपि एकं विषयम् अधिकृत्य अनुच्छेदं षड्वाक्येषु लिखत : 1×6=6

(i) जीवने स्वच्छतायाः महत्त्वम्

(ii) वर्षा – ऋतुः

(iii) मधुरा वाक्

37 भवान् प्रणवः। भवतां मित्रं सौम्यः राज्यस्तरीय श्लोकोच्चारण प्रतियोगितायां प्रथमं पुरस्कारं प्राप्तवान्। तं प्रति वर्धापन सन्देशं प्रेषयितुं पत्रं लिखत। 1×6=6

**अथवा**

भवान् ऋषभः ।

स्वविद्यालये नाटक प्रतियोगितायां भवता अभिनयः कृतः। तत् सूचयन भवान् स्वपितरं प्रति पत्रं लिखत।

---



www.FirstRanker.com